सं० ४८८४

नाम – ऊर्ध्वाम्नायः

कर्त्ता – ×

पत्रसंख्या – ३५ पत्राणि सं० ×

विषयः – तन्त्रम्

उधान्याय

रता



ऊ॰म्ना॰ ॥श्रीगणेशायनमः॥ ॥ईश्वरउवाच शृणुदेविप्रवक्ष्यामियत्मात्वंपरिपृच्छसि त
१ स्यश्रवणमात्रेणदेवतासुप्रसीदति १ कस्यचिन्नमयाख्यातमितः पूर्वंकुलेश्वरि
कथयामितवस्नेहानदूर्ध्वाम्नायंशृणुप्रिये २ वेदशास्त्रपुराणानिप्रकाश्यानिसुरे
श्वरि शैवाद्याश्चागमाः सर्वेरहस्याः परिकीर्त्तिताः ३ रहस्यातिरहस्यानिकुलशास्त्रा
णिपार्वति रहस्यातिरहस्यानांरहस्यमिदमंबिके ४ ऊर्ध्वाम्नायार्थतत्वंहिपूर्णाहं
तात्मकंपरं सुगोपितंमयायत्नादिदानींतुप्रकाश्यते ५ ममपंचमुखेभ्यश्चपंचाम्ना
याः समुद्गताः पूर्वश्चपश्चिमेचैवदक्षिणश्चोत्तरस्तथा ६ ऊर्ध्वाम्नायश्चपंचैतेमो ऊम॰
क्षमार्गाः प्रकीर्त्तिताः आम्नायाबहवः संतिनोर्ध्वाम्नायेनतेसमाः ७ सत्यमेत १

द्वारोद्देनात्रकार्याविचारणा आम्नायाबहवोगुप्ताश्चतुराम्नायभेदजाः ८ अस्मि
न्तंत्रेमयाख्याताः एवंतेकुलनायिके चतुराम्नायवेत्तारोबहवः संतिभामिनि ९
ऊर्द्ध्वाम्नायार्थतत्वज्ञाविरलाविरवंदिते यावंतः पांसवोभूमेस्तावंतिसमुदीरिताः १०
एकैकाम्नायजामंत्राभुक्तिमुक्तिफलप्रदाः उपमंत्राश्चतावंतः शावराः समुदाहृताः
११ मयैवकथितास्तेपिलोकानुग्रहकांक्षया सर्वेषामपिमंत्राणांदेवतास्तत्फलप्रदा
१२ आवयोरंशसंभूतास्तेसमुद्दिष्टाः शुचिस्मिते सर्वमंत्रानहंवेद्मितान्योजानातिकश्च
न १३ मत्प्रसादेनयः कोपिवेत्तिमानवकोटिषु एकाम्नायंचयोवेत्तिसमुक्तोनात्रसंश
यः १४ किंपुनश्चतुराम्नायवेत्तासाक्षाच्छिवोभवेत् चतुराम्नायविज्ञानादूर्ध्वाम्नायः

ऊ॰म्ना॰ परःप्रिये १५ तस्मात्तदेवजातीयाद्युरिक्छेदात्मनोदितं ऊर्द्ध्वत्वात्सर्वधर्माणामूर्द्ध्वाम्ना
२ यःप्रशस्यते ऊर्द्ध्वंनयत्यधस्थंचेदूर्द्ध्वाम्नायइतीरितः १६ उर्ज्जितत्वात्कुलेशानिध्व
स्तसंसारसंकटात् ऊर्द्ध्वलोकैकसेवात्वादूर्द्ध्वाम्नायइतिस्मृतः १७ तस्माद्देवेशिजा
नीहितस्मान्मोक्षैकसाधनं सर्वाम्नायाधिकंपुण्यमूर्द्ध्वाम्नायंपरात्परं १८ सर्वलो
2 केषुसर्वेषामहंपूज्योयथाप्रिये आम्नायेषुचसर्वेषुऊर्द्ध्वाम्नायस्तथाप्रिये १९ देव
तानांयथाविष्णुर्ज्योतिषांभास्करोयथा अश्वमेधःक्रतूनांतुपाषाणानांयथामणिः
२० यथारसानांमधुरोलोहानांकांचनंयथा चतुष्पदांयथाधेनुर्यथाहंसस्तुपक्षिणां एम॰
२१ आश्रमाणांयथाभिक्षुर्वर्णानांब्राह्मणोयथा मनुष्याणांयथाराजावयवानां २

यथाशिरः २२ आमोदानां तु कस्तूरी यथा कांचीपुरीषु च तथैव सर्वधर्माणाम् ऊर्ध्वाम्नायो
त धिकः प्रिये २३ नानाजन्मार्जिपरपुण्यकर्मफलोदयात् ऊर्ध्वाम्नायं विजानीयान्नान्य
थावीरवंदिते २४ न वेदैर्नागमैः शास्त्रैः न पुराणैः सुविस्तरैः न यज्ञैर्न तपोभिर्वा न तीर्थ
व्रतकोटिभिः २५ नान्यैरुपायैर्देवेशि मंत्रौषधिपुरःसरैः आम्नायो ज्ञायते चोर्ध्वः श्रीम
द्गुरुमुखं विना २६ तमेवान्वेषयेत्तस्मात्सर्वसंज्ञकरुणानिधिः सर्वलक्षणसंपन्नम्
ऊर्ध्वाम्नायार्थकोविदं २७ तस्माद्विविजानीयादूर्ध्वाम्नायं कुलेश्वरि लभते कांक्षि
तां सिद्धिं सत्यं सत्यं वरानने ऊर्ध्वाम्नायं विजानाति यः सम्यक् श्रीगुरोर्मुखात् शास्त्र
मार्गेण स नरो जीवन्मुक्तो न संशयः ईदृशं चोर्ध्वाम्नायं वै यो जानाति हि तत्त्वतः स वंद्यः
गु सद्गुरुः सोचाः स वै विज्ञः स मांत्रिकः स सेव्यः स च मे भक्तः स यष्टव्यः स सात्विकः स

उ०म्ना० व्रतीसतपस्वीचसोनुष्ठातासपूजकः सवेदागमशास्त्रादिसर्वविद्याविशारदः सआचा
३ र्यःसचश्रीमानसपण्डितःसचकौलिकः सयज्वासचपूतात्मासजापीसचसाधकः
सयोगीसकृतार्थस्तुसवीरःसचउत्तमः सपुण्यात्माससर्वज्ञःसमुक्तःसशिवःप्रिये
तत्कुलंपावनंदेविधन्यातज्जननीस्मृता तत्पितात्रकृतार्थःस्यान्मुक्तास्तत्पितरस्तथा
पुण्यास्तद्वंशजाःसर्वेपूतास्तन्मित्रबांधवाः बहुनेहकिमुक्तेनचोर्द्धाम्नायपरस्यच
स्मरणंकीर्त्तनंवापिदर्शनंवंदनंतथा संभाषणंचकुरुतेराजसूयाधिकंफलं सयत्र
वसतेदेवितत्रश्रीर्विजयोभवेत् अनामयंसुकृष्टिश्चसुभिक्षंनिरुपद्रवः तस्माद्गुरु
प्रसादेनचोर्द्धाम्नायंनरोत्तमः योवेत्तितत्वोदेविसमेप्रियतमोभवेत् पूर्वाम्नायःसृ एम०
ष्टिरूपःस्थितिरूपश्चदक्षिणः संहारःपश्चिमोदेविउत्तरोनुग्रहोभवेत मंत्रयोगंविदुःप ३

वंभक्तियोगंतुदक्षिणं पश्चिमंकर्मयोगंतुज्ञानयोगंतथोत्तरं पूर्वाम्नायस्यसंकेतश्चतु
र्विंशतिरीरितः दक्षिणाम्नायसंकेतः पंचविंशतिरीरितः पश्चिम्नायसंकेतोद्वात्रिंशत्स
मुदाहृतः विंदुःषड्त्रिंशदाम्नायःसंकेतः श्रीमदुत्तरे ऊर्ध्वाम्नायस्यचैतानिनसंतिकुल
नायिकेसाक्षाद्ज्ञानस्वरूपावानकिंचित्कर्मविद्यते ऊर्ध्वाम्नायस्यमाहात्म्यमितितेकथि
तंमया समासेनकुलेशानिमंत्रमाहात्म्यमुच्यते इतः पूर्वंमयानोक्तंयस्यकस्यापि
पार्वति तद्वदामितवस्नेहाच्छृणुमत्प्राणवल्लभे श्रीप्रसादपरामंत्रमूर्ध्वाम्नामधिष्ठितं
आवयोपरमाकारंयेवेत्तिसशिवःस्वयं शिवादिकृमिपर्यंतंप्राणिनांप्राणवर्त्मना निः
श्वासोच्छ्वासरूपेणमंत्रोयंवर्त्ततेप्रिये अनिलेनविनामेघोयथाकाशेनचेष्टते पराप्र
सादमंत्रेणविनालोकस्तथाप्रिये पराप्रासादमंत्रार्थस्यतमेतच्छृणुचरं अभिन्नंत

उ०म्ना० स्तेतोदेविदाताल्लतेयथानिलः बीजेंकुरस्तिलेतैलेमत्ताबोस्वरवोप्रभा चंद्रेज्योत्स्नान
४ लः काष्ठेपुष्पेगंधोजलेरसः शब्देचाथशिवेशक्तिः क्षीरेसर्पिःफलेरुचिः शर्करायांचमाधु
र्यंघनसारेशशीतले नियंतानुग्रहोमंत्रेप्रतिमायांचदेवता दर्पणेप्रतिबिंबंचसमीरे
चलनंयथा पराप्रासादमंत्रोयंप्रपंचेपितथास्थितः वटबीजेयथावृक्षः सूक्ष्मरूपेणति
ष्ठति पराप्रसादमंत्रेपिब्रह्मांडोपितथास्थितः सुपक्वेषुपदार्थेषुसरसेषुकुलेश्वरि ल
5 वणेनविनास्वादुर्यथाभोक्तुर्नजायते पराप्रसादमंत्रेणयेमंत्रावानसंगताः तेफलं
नप्रयच्छंतिमंत्रशक्तिविवर्जिताः श्रीप्रसादपरामंत्रगोपनायकुलेश्वरि विचार्यादं
पुराणानिदर्शनाम्नायवेदजाः समवीक्ष्यंतयेमंत्राःशास्त्राणिविविधानिच भ्रमंति राम०
येषुमूढास्तेतवमायाविमोहिताः जायंतेचम्रियंतेचसंसारक्लेशभाजनाः नलभं ४

तेहिमोक्षंतेतत्प्रसादाद्विवर्जिताः मद्रूपेश्रीगुरौयस्यदृढाभक्तिःप्रजापते पूर्वजन्मसह
स्रेषुशिवादिसमयोदितान् चतुराम्नायजान्मंत्रान्गुर्वनुज्ञांभविष्यति सपापकंचुको
न्मुक्तः शुद्धात्मागुरुवत्सलः श्रीप्रासादापरंमंत्रंविजानातिनचान्यथा श्रीप्रासादपरामं
त्रंसज्ञात्वाशुभमुच्यते ब्रह्मविष्णुरुद्राश्चशक्रादिःसुरपुंगवाः वसुरुद्रार्कदिक्पाल
मनुचंद्रादयःप्रिये मार्कंडेयादिमुनयोवशिष्टादिमुनीश्वराः सनकाद्याश्चयोगीशाजी
वन्मुक्ताःशुकादयःयक्षकिन्नरगंधर्वसिद्धविद्याधरादयःश्रीप्रासादपरामंत्रप्रसादा
त्कामितंफलं प्राप्यमंत्रपरंनित्यंजपंत्यद्यापिपार्वति सामर्थ्यंपूज्यताविद्यातेजः
सौम्यमरोग्यता राज्यंस्वर्गंचमोक्षंचपरप्रासादजापितः रुद्रेंद्रब्रह्मविष्णूनामपि
दूरायतेपदं सर्वधर्मविहीनोपिपराप्रासादमंत्रवित् सुखेनयांगतिंयातितितंतांस

उ० म्न० वैपिधार्मिकाः तस्यचिंतामणिमधेनुः कल्पतरुर्गृहे कुबेरः किंकिरः साक्षात्पराप्रासा
५ दजापिनः यथादिव्यरसस्पर्शाल्लोहोभवतिकांचनं पराप्रसादजापीचशुचिःपशुपति
स्तथा श्रीप्रासादपरामंत्रंयोजानातिदृढतत्वतः समांचत्वांचजानातिचावयोरपिसप्रि
यः पराप्रासादमंत्रज्ञः श्वपचोवापिपार्वति देवतास्थापनेशक्तः प्रतिमादिषुशंस
यः मंत्रमात्रेचयोवेत्तिपराप्रसादसंज्ञकं श्वपचोवापिमुच्येतकिंपुनस्तद्विधानवित्
5 पराप्रासादमंत्रज्ञोपस्कारोतियदीछति यद्भूतेतन्महेशानितपोध्यानंजपोभवेत्
दीक्षापूर्वंमहेशानिपारंपर्यसमन्वितं पराप्रासादमंत्रंयोवेत्तिसोसोवान्नसंशयः
चराचर ~ मेतानिभुवनानिचतुर्दश पराप्रासादमंत्रज्ञदेहेतिष्ठंतिपार्वति पराप्रासा राम०
दमंत्रज्ञोपत्रतिभामिनि दिव्यक्षेत्रंसमुद्दिष्टंसमंतादृशयोजनं पराप्रसादमंत्रा ५

र्थंतत्वज्ञं कुलौलनायिके सुरासुराश्चवदंते किंपुनर्मानवादयः परप्रासादमंत्रज्ञमनु
तिष्ठंति पार्वति देवक्षेत्रनदीयोगिमुनिदेवगणेः सह शैववैष्णवदौर्गार्कगाणपत्यं
दुर्लभं भवान सर्वमंत्रान्सजानाति परप्रासादमंत्रवित् श्रीप्रासादपरामंत्रो जिह्वाग्रे
यस्यवर्त्तते तस्यसंदर्शनादेवश्चपचोपि विमुच्यते ब्राह्मणोवांत्यजोवापिसुचिर्वा
प्यसुचिः प्रिये परप्रासादजापीयः समुक्तोनात्रसंशयः गच्छन्तिष्ठन्तोवापिजा
ग्रतः स्वपतोपिवा परप्रासादमंत्रोयं देवेशिनचनिःफलः चिरेणैकैकफलदामं
त्राः संतिसहस्त्रशः कलेशिमंत्रराजोयं शीघ्रंसर्वफलप्रदः परप्रासादमंत्रोयंस
र्वमंत्रोत्तमोत्तमः जानतोऽजाततोवापिभजतांकामदोमणिः शचींद्रोरोहिणी
चंद्रोस्वाहाग्नीवप्रभाखी लक्ष्मीनारायणोचान्याधातारोगिरिजाशिवो अग्निसोमो

उ०म्न० विंदुनादौदेवि प्रकृतिपुरुषौ आधाराधेयनाम्नोच भोगमोक्षौकुलेश्वरि प्राणापानौ
६ चशब्दार्थौ प्रिये विधिनिषेधकौ सुखदुःखादियद्वंद्वंदृश्यते श्रूयतेपिवा सर्वलोकेषुय
त्सर्वंभावामेवनसंशयः पुंस्त्रीरूपाणिसर्वाणिचाषयोरंशजानिहि पराप्रासादमंत्रो
यंतत्स्वात्मकोभवेत् अरूपंभावनागम्यंपरंब्रह्मकुलेश्वरि निष्कलंनिर्मलंनित्यंनि
र्गुणंव्योमसन्निभं अनंतमव्ययंतत्वंमनोवाचामगोचरं पराप्रासादमंत्रानुसंधा
6 नात्संप्रकाशते तस्मान्मंत्रमिदंदेवि पराप्रासादसंज्ञकं परतत्वस्वरूपत्वात्साक्षाद्विदान
दलवणात् शिवशक्तिमयत्वाच्च भुक्तिप्रदानतः सकर्मापिचनिष्कर्मासगुणंचापिनि
र्गुणं श्रीप्रासादपरामंत्रंसर्वमंत्रशिखामणिं जपन्मुक्तिंचभुक्तिंचलभतेनात्रसंशयः एम०
बहुनात्रकिमुक्तेनसर्वसारंशृणुप्रिये श्रीप्रासादपरामंत्रसमोमंत्रोनविद्यते इद ६

मेवपरंज्ञानमिदमेवपरोजयः इदमेवपरंध्यानमिदमेवपरार्च्चनं इदमेवपरादीक्षा इद
मेवपरंजयः इदमेवपरंधर्ममिदमेवपरंव्रतं इदमेवपरोयज्ञइदमेवपरात्परं इदमेव
परंश्रेयइदमेवपरंफलं इदमेवपरंतत्वमिदमेवपरागतिः इदमेवपरंगुह्यंसत्यंस
त्यंनसंशयः इतिमत्वामनुवरंतत्तनिष्टःस्यात्सदाप्रिये नास्तिगुर्वधिकंतत्वंनशिवा
धिकंदैवतं नहिवेदाधिकाविद्यानकुलाधिकदर्शनं नकुलाद्याधिकोज्ञानीज्ञानाद्ध्याना
धिकंसुखं नाष्टाष्टकाधिकाएजानन्दिमोक्षाधिकंफलं श्रीप्रासादपरामंत्रात्दधिकंनैव
विद्यते इदंसत्यमिदंसत्यमिदंसत्यंनसंशयः श्रीप्रासादपरामंत्रमाहात्म्यरिवर्णि
तुं नशक्नोमिवरारोहेकल्पकोटिशतैरपि गिरोसर्षपमात्रंतुसागरेजलतुकांवदेत त
याचमंत्रमाहात्म्यंकिंचितेकथितंमया ऊर्ध्वाम्नायस्यमाहात्म्यंश्रीप्रासादपरामृतोः॥

उ०म० श्रीईश्वरउवाच॥ ॥ श्रीदेव्युवाच॥ ॥कुलेशश्रोतुमिछामिश्रीप्रासादपरात्मकं मंत्र
७ राजं वदेशानन्यासध्यानादिभिः सह॥ ॥ श्रणुदेवि प्रवक्ष्यामियन्मांत्वंपरिपृछसि
तस्यश्रवणमात्रेणशि — कारः प्रजायते इतः पूर्वमयानोक्तंमंत्रायंयस्यकस्यचित
तवस्नेहाद्ददाम्यद्य श्रणुत्प्राणवल्लभे अनंतंचंद्रभुवनविंदुविंदुयुगान्वितं श्रीप्रासाद
परामंत्रोभुक्तिमुक्तिफलप्रदः पराप्रासादमंत्रस्तुसादिरुक्तःकुलेश्वरि अनंतःसका
रःचंद्रः सकारःभुवनश्रोकारः विंदुरनुस्वारः विंदुयुगंविसर्गः एतैः स्हौःइतिबीजंसि हौः
द्धं अयंप्रासादपरामंत्रः अयमेवमंत्रःसकारादिश्चेतपराप्रासादमंत्रोभवति त
थाप्रकाशानंदरूपत्वात्स्वस्वरूपफलदानतः प्रसन्नचित्तरूपत्वात्मसिद्धार्थनिरूपनात रा०म०
भक्तनाघप्रशमनात्प्रयत्नार्त्तिनिवारनात प्रसादकरणाछीघ्रंप्रासादमनुरीरितः ७

परतत्त्वस्वरूपत्वात्संसिद्धार्थनिरूपणात् परमानंदजननात्परमैश्वर्यकारणात् प
रोक्षफलदानाच्च परधर्मनिदर्शनात् परत्वात्सर्वमंत्राणां परमंत्र इतीरितः कुलमंत्र
मिदं देवि त्याहान् शृणु वदामि ते अथ प्रातः समुत्थाय गुरुदेवात्मचिंतनं कत्स्नमले
षकृत्वा च कुर्याद्विरामस्रमोचनं सौचास्यशोधनं स्नानं संध्यातर्पणचारेत् एकांतेद्वा
रयजनं विघ्नत्रयनिवारणं पूजास्थानं प्रवेशं च कुर्यात्समुपवेशनं देवि पूजागदध्या
नं शिवादिगुरुवंदनं आसनं गणपक्षेत्रपालवंदनमीश्वरि पादुकास्मरणं कुर्याद्दीपना
थार्चनं प्रिये करांगशोधनं प्राणायामं सब्रह्मरंध्रकं दिग्बंधनं चांगयुग्मं विधियुक्ताव
मातृका दशप्रकारस्ताख्य लिपिः कमठसंज्ञकं षडीर्घमूलबीजेन षडंगानि च पा
र्वति पंचब्रह्माणि च तथा चांगुलिन्यासमेव च आधारशक्तिमारभ्य पीठमंत्रांतमंवि

उ०म्ना० के अंतःषोढांकुलेशान्तिंकुर्यात्सर्वोक्तवर्त्मना महाषोढाह्वायंन्यासंततःकुर्यात्समाहि
८ तः वक्ष्यमाणेनविधिनादेवताभावसिद्धये यस्यकस्यापिनैवोक्तंतवस्नेहाद्ददाम्यहं
प्रपंचोभुवनंमूर्त्तिर्मंत्रदैवतमातरः महाषोढाह्वयोन्यासः सर्वन्यासोत्तमोत्तमः ल
लिताविलासे ऋषिर्ब्रह्मासमुद्दिष्टोगायत्रीछंद ईरितं अर्द्धनारीश्वरोदेवोदेवतापरि
कीर्त्तितः ओंकाराद्यैःस्वरैर्द्दीर्घैर्नपुंसकविवर्जितैः संयोज्यकइद्वितयंविन्यसेन्मूर्त्ति
8 पंचकं अंगुष्ठादिष्वंगुलीषुमूर्द्धास्यहृदयेषुच गुह्येपादद्वयेपंचवक्त्रस्थानेषुविन्य
सेत् ईशानाख्यंतत्पुरुषमघोरंचतृतीयकं चतुर्थंवामदेवंचसद्योजातंचपंचमं
त्रितारांतेहसौंत्यहोमीशीनायनमस्ततः अंगुलीषुचमूर्द्धादिष्वेवंविन्यस्यदेशिकः एम०
ईशानायोर्द्ध्ववक्त्रायनमोमूर्द्ध्निविन्यसेत् एवंतत्पुरुषायांतेपूर्ववक्त्रायत्वन्मुखे ८

दक्षकर्णेनवामेचचूडाधश्चप्रविन्यसेत दक्षिणंचोत्तरंवक्त्रंपश्चिमशिष्टमूर्त्तिभिः इति
अंगप्रविन्यस्यवक्षामाणंस्मरन्शिवं महाषोढाह्वयन्यासंततःकुर्यात्समाहितः तत्रा
दौपरमेशानिप्रपंचन्यासउच्यते प्रपंचद्वीपजलधिगिरिपदनपीठकाः॥ क्षेत्रंवानाश्र
मगुहानदीचत्वरकोद्भिजाः स्वेदजांडजरायुजाइत्युक्ताद्विचषोडश श्रीर्ल्लीयाकमला
विष्णुवल्लभापद्मधारिणी समुद्रतनयालोकमाताकमलवासिनी इंदिरामारमापद्मत
यानारायणप्रिया सिद्धलक्ष्मीराज्यलक्ष्मीर्महालक्ष्मीरितीरिताः शक्तयःस्युःप्रपं
चानांस्वराणामधिदेवताःलवस्त्रुटिःकलाकाष्ठानिमेषःश्वासएवचघटिकाश्चमु
हूर्त्तश्चप्रहरोदिनएवच संध्यारात्रिस्तिथिश्चैववारोनक्षत्रमेवच योगश्चकरणं
पक्षोमासोराशिर्ऋतुस्तथा अयनंवत्सरंयुगंप्रलयाःपंचविंशतिः आयोमांचंडि

उ०म्ना० कादुर्गाशिवापर्णाम्बिकासती ईश्वरीशांभवीशानीपार्वतीसर्वमंगला दाक्षायणीहै

२ मवतीमहामायामहेश्वरी मृडानीचैवरुद्राणीसर्वाणीपरमेश्वरी कालीकात्यायनी

गौरीभवानीतिसमीरिताः शक्तपस्यलेवादीनांस्पर्शानामधिदेवताः पंचभूतास्तत

न्मात्राः कर्मज्ञानेंद्रियानिलाः गुणांतःकरणावस्थाधातुदोषादशेरिताः ब्राह्मीवा

गीश्वरीवाणीसावित्रीचसरस्वती गायत्रीवाक्प्रदापश्चाछारदाभारतीप्रिये विद्यात्मि

१ कापंचभूतव्यापकानामधीश्वराः त्रितारामूलविद्यांतेमातृकाक्षरतःपरं वदेत्मपंच

रूपायैश्रियैनमइतिक्रमात् प्रपंचादिभिराभोज्यवर्णाशक्तिर्नियोजयेत् मातृका

न्याससंप्रोक्तस्थानेषुपरमेश्वरि त्रितारमूलसकलप्रपंचस्यात्स्वरूपतः आद्येपराँबा एम०

देव्यैनमउक्त्वाव्यापकंन्यासेत् प्रपंचन्याससर्वंस्याद्भुवनन्यासउच्यते त्रितारमूल २

विद्यांतेऋंॠमिमतलंवदेत लोकंचनिलयंचैवशतकोटिपदंततः।गत्वाठ्योयोगिनी
म्लदेवतांतेयुतंप्रिये वदेदाधारशक्त्यांवादेव्यैस्तत्याद्योन्यसेत ईंऊंवितलंगुल्फ
लोकंचानंतसंज्ञकं शेषंचपूर्ववत्प्रोक्तागुल्फयोर्विन्यसेत्प्रिये ॠंॠंलंसुतलंवापिगु
ल्फंचाचिंत्यसंज्ञिकं शेषंचपूर्ववत्प्रोक्ताजंघयोर्विन्यसेत्प्रिये ऌंमेमैंमहातलंचमह
गुल्फंस्वतंत्रकं शेषंचपूर्ववत्प्रोक्तादेविजान्वोप्रविन्यसेत औंओंतलातलंपरमगुल्फंवो
स्काविधानकं शेषंचपूर्ववत्प्रोक्ताचोर्वोर्द्वेशिविन्यसेत अंमोरंसातलंचैवरहस्यंज्ञा
नसंज्ञकं शेषंचपूर्ववत्प्रोक्तागुह्यदेशेन्यसेत्प्रिये कवर्गमपिपातालंमरहस्यंचत
रक्रिया॥शेषंचपूर्ववत्प्रोक्तामूलाधारेन्यसेत्प्रिये चवर्गभूरतिरहस्यंचश्रीडाकिनीम
पि शेषंचपूर्ववत्प्रोक्तास्वाधिष्ठानेन्यसेत्प्रिये टवर्गभूरत्वमहोरहस्यंराकिनीमपि शेषं

उ०म० चपूर्ववत्प्रोक्तानाभिदेशेन्यसेत्प्रिये तवर्गंस्वश्चपरमरहस्यंलाकिनीमपि शेषंचपूर्व
१० वत्प्रोक्तांहृदयेविन्यसेत्प्रिये पवर्गंचमहागुप्तंकाकिनीमपिचक्रमात्शेषंचपूर्ववत्प्रो
क्ताकंदेदशेन्यसेत्प्रिये पंवर्गंचजनोगुप्तंतरश्चासाकिनीमपि शेषंचपूर्ववत्प्रोक्ताचा
ज्ञायांविन्यसेत्प्रिये शवर्गंचतपश्चापिगुप्तंश्रीहाकिनीमपि शेषंचपूर्ववत्प्रोक्तांल्ललाटे
विन्यसेत्प्रिये लंक्षंसत्यमहद्गुप्तंयाकिनीमपिचप्रिये शेषंचपूर्ववत्प्रोक्तांब्रह्मरंध्रे
10 न्यसेत्सुधीः त्रितारमूलमंत्रांतेचतुर्दशंभुवंवदेत् नाधिपायैश्रीपरांबाख्येत्हृद्व्याप
कंन्यसेत् कृत्वैवंभुवनन्यासंमूर्त्तिन्यासमथाचरेत् केशवनारायणमाधवमाधवगो
विंदविष्णवः मधुसूदनसंज्ञश्चस्यात्त्रिविक्रमवामनौ श्रीधरश्चहृषीकेशः पद्मना राम०
भोदामोदरः वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः अस्याद्येष्टदेशानाउग्रीर्द्धन १०

यनस्तथा अद्रिस्थलपिशीलुमाल्तदोषैकनायिका ऐकारिणीचोद्यतीचोर्वकाचांजन
प्रभा अस्थिमालाधराचेतिसंप्रोक्ताः स्वरदेवताः भवः शर्वोथरुद्रः पशुपतिश्चोग्रएवच
महादेवस्तथाभीमईशस्तत्पुरुषाह्वयः अघोरः सद्योजातश्चवामदेवइतीरिताः करभद्रा
खलेवल्लागरिमादिफलप्रदा घोरपादपंक्तिनाशातथाचंद्रार्द्धधारिणी छंदोमयीजगत्स्था
नाङ्कृतिश्चजनः परा ज्ञानदाचततष्टकूठकूधराठंकृतिश्चडामरी कभादीनांठडांतानां
वर्णानांदेवतास्त्विमाः ब्रह्माप्रजापतिर्वेधापरमेष्ठीपितामहः विधाताथविरिंचिश्च
स्त्रष्टाचचतुराननः हिरण्यगर्भइत्युक्ताः क्रमाद्रुद्रादयोदश यक्षिणीरंजनीलक्ष्मी
वज्रिणीशशिधारिणी षडाधारलयासर्वनायिकाद्युसितानना: ललिताचक्षमाचे
तिप्रोक्तायाद्यार्णदेवताः त्रितारमूलमंत्रांतेस्वाराविद्धनसशक्तिकान् चतुर्थ्यांतम

सायुक्तान्मूलेकेचाननेन्यसेत् संस्कंधपार्श्वकमूरजानुजंघापदेषुच दक्षादिवामपर्य्यं
११ तंविन्यसेत्परमेश्वरि कभाद्यर्णयुतान्मंत्री भवानीशक्तिसंयुतान् पादपार्श्वबाहुकंठ
पंचवक्रेषुविन्यसेत् दक्षाधारेषुब्रह्मादिर्यादिशक्तियुतान्न्यसेत् त्रितारमूलमंत्रांतेश्री
मूर्त्यम्बिकाततः आयैपरांवाद्वोनमउक्त्वाव्यापकंन्यसेत् मूर्त्तिन्यासंविधायेत्थंमं
त्रन्यासमथाचरेत् त्रितारमूलमंत्रांते एकलक्षंचकोटिचा। भेदस्यप्रणवाद्येकारौसे
त्माखिलमंत्रतः ततोधिदेवतायैस्यात्सकलंचफलप्रदं आयैतथैककूटेश्वर्य्यम्बाद
व्यैनमोवदेत् ईमुमंचढिलक्षादिदंसादिपूर्ववत्परं ऋंटऋंदलंटचत्रिलक्षादित्रिकूटंपू
र्ववत्परं ल्हंमैमैंचचतुर्लक्षंचंद्रादिपूर्ववत्परं ओमोमंमः पंचलक्षंसूर्यादिपूर्वव राम०
त्परं कंखंगंचैवषड्लक्षंस्कंदादिपूर्ववत्परं चंडंवंसमलक्षंगणेशादिपूर्ववत्परं छंजं ११

भ्रमष्टलसंवटुकादिस्वर्वेवत्तपरं धंनंयंद्वादशलसंवारुण्यादिंस्वर्वेवत्यरं फंवंमंत्रयोदश+
जंठंठंनवलसंचब्रम्लादिस्वर्वेवत्यरं ॥ उठणांदशलसादिविद्यादिपूर्वेवत्यरं तंथंदमेकाद
शलसंशैपादिंस्वर्वेवत्यरं + लसंलक्ष्म्यादिंस्वर्वेवत्यरं मंयंरंचचतुर्दशलसंगोर्यादिंस्वर्व
वत्यरं लंवंशंपंचदशलसंदुर्गादिंस्वर्वेवत्यरं पाद्यशंषोडशलसंत्रैपुरादिचषोडश स
रात्माखिलमंत्राधिदेवतात्मकलंभवेत तथाफलप्रादायेषोडशकूटस्पर्शयुतः अंवा
देव्यैनमः प्रोक्तोमंत्रन्यासोमहेश्वरि आधारलिंगयोर्नाभिहृत्कंठास्यालिक्षकश्रुतौ
निरोधिकायामर्द्धेंदौविंदौचैककलापदे उन्मादिषुवक्रेषुनादानादांतयोरपि ध्रुव
मंडलदेशेचविन्यसेत्कुलनायिके त्रितारमूलमंत्रांतेसर्वमंत्रात्मिकापरं आयेपरा
वादेव्यैवत्हृदयेव्यापकंन्यसेत मंत्रन्यासंविधायेत्थंदेवतान्यासमाचरेत त्रितारमू

उ॰म॰ लमंत्रांतेअंआंमत्स्यकोदरिच योगिकुलशब्दांतेसेविताय्यैपरंवदेत विधिनिवृत्तंवादे
१२ व्यैनमइत्युच्चारेत्प्रिये इंईंयोगिप्रतिमांचशेषंपूर्ववदुच्चरेत उंऊंतपस्विविद्यांचशेषं
पूर्ववदुच्चरेत ऋंॠंशांतंतथाशांतिशेषंपूर्ववदुच्चरेत ऌंॡंमुनिशांत्यतीताशेषं एंऐं
देवंतुल्यत्रैलोक्यांशेषं ओंऔंमोराक्षसशब्दांतेगगनांपूर्ववदुच्चरेत अमर्विद्याधरंरक्तांशेषं
कंखंसिद्धमहाच्छुष्मांशेषंगघंसाध्यंकरालीचशेषंङ॰ चंतथाप्सरजपाशेषं छंजंगंध
12 र्वविजयांशेषं झंञंगुह्यकशब्दांतेअजितांपूर्ववत्स्मरां टंठंपक्षापराजिताशेषंडंढं
किन्नरवामांचशेषंणंतंचपन्नगज्येष्ठांशेषं धनंगरोशमायाचशेषं पंफंभैरवश
ब्दांतेकुंडलीपूर्ववत्स्मरेत् बंभंवटुककालीचशेषं मंयंसेत्रेशशब्दांतेकालरात्रिंचपूर्वव राम॰
त् रंलंप्रथमभगवतीशेषंवः वंशंब्रह्मलाचसर्वेशीशेषंसंविज्ञुंचसर्वज्ञांचशेषं हं १२

लंरुद्रंसर्वकर्त्तारंशेषं मंयंक्षेत्रेशशब्दांतेकालरात्रिंचपूर्ववत् खेचराचरशक्तिंचशेषंपू
र्वयंष्टगुल्फजंघाचजानूरुकटिपार्श्वयोः स्तनकक्षकरस्कंधकर्णाम्रर्द्धिचरंधके दक्ष
भोगादिवामांतंविन्यसेत्कुलनायिके त्रितारमूलमंत्रांते सर्वदेवात्मिकाततः श्रीये
परांवादेव्यैचहृदयेनतुव्यापकं देवन्यासंविधायेत्थंमातृकान्यासमाचरेत् त्रितार
मूलमंत्रांतेवर्णानंतुकोटिभू चरीकुलंचसहितायैश्रीक्षांसंगलापरं श्रीवादेव्यैततो
जयादांक्षांब्रह्माणीतः परंश्रीवादेव्यैततोनंतकोटिभूतकुलेवदेत्संहितायैचश्रीसं
मंगलनाथायश्रीवदेत् स्वचासितांचभैरवनाथायनमउच्चरेत् चवर्गंखेचरीमीलां
चर्चिकांचमहेश्वरीं वेतालमिलिंचर्चिकंचरुरुंशेषंचपूर्ववत् ठवर्गंपातालवशींमू
हांयोगेश्वरींवदेत् कौमारींपिशाचंडंहवरे गेशचंडकौ तवर्गंदिक्करींरिंसाहरसिद्धा

वावैस्नवी अपस्मारं रिंसंहार सिद्धक्रोधादिरूर्ववत् पवर्गस्तद्वचरीं ल्हं षां भद्दिनीवाराह
१३ तःपरं स्यात्ब्रह्मराक्षसं ल्हं षं मधुन्मत्तादिरूर्ववत् पवर्गः स्याद्गिरिचरीं ऐं शां किलि किलि किले
तिच इंद्राणी चेटकं श्रं शं किलिकिलश्च कपालिकः शवर्गः स्याद्वनचरी औं शं कलादि
रात्रिच चामुंप्रेत औं वं च कालरात्रिश्च भीषणाः लं क्षं जलचरी आः लां भवेत्यश्चाच
भीषणा महालक्ष्मीश्च कूष्माण्डश्च अं लं पश्चाच्च भीषणाः संहारभैरवश्चाति शेषं पूर्ववं
13 डश्चरेत् मूलाधारे लिंगनाभ्येनाहृत विशुद्धिषु आज्ञाभालतलब्रह्मरंध्रेष्वेवं प्रविन्यसे
त् चितारमूलमंत्रां ते मातृकामातृभैरव अधिपापैपरां वादेव्यै नमो स्काव्यापकं
न्यसेत् मातृन्यासं कुलेशानि कुर्यादेवं समाहितः एवन्यस्ततत्त्वदेहे विध्यायेद्देवमन राम
न्यधीः अमृतार्णवमध्यास्थस्वर्णद्वीपे मनोरमे कल्पवृक्षवनांते स्थितवमानिक्य १३

मंडपे नवरत्नमये श्रीमत्सिंहासनगतांबुजे त्रिकोणांतः समासीनं चंद्रसूर्यशतप्र
भं अर्द्धांबिकासमायुक्तं प्रविभक्तविभूषणं कोटिकंदर्पलावण्यं सदाषोडशवार्षिकं मं
दस्मितमुखांभोजं त्रिनेत्रं चंद्रशेखरं दिव्यांबरस्रगालेपं दिव्याभरणभूषितं पानपा
त्रं च चिन्मुद्रां त्रिशूलं पुस्तकं करैः विद्यासंसदि बिभ्राणं सदानंदमुखेक्षणं महाषो
ढोदिताशेषदेवतागणसेवितं एवं चित्तांबुजे ध्यायेदर्धनारीश्वरं विभुं पुंरूपं वा स्मरे
द्देवि स्त्रीरूपं वा चिंतयेत् अथवा निष्कलं ध्यायेत्सच्चिदानंदलक्षणं सर्वतेजोमयं ध्या
येत्सचराचरविग्रहं ततः संदर्शयेन्मुद्रादशकं परमेश्वरि योनिलिंगं च सुरभिं इति मुद्रा
चतुष्कं वनमालां महामुद्रां नमोमुद्रामपि क्रमात् यथाशक्ति जपेन्मूलमंत्रं श्रीपादुका
मपि मूर्द्धि संचिंतयेद्देवं श्रीगुरुं शिवरूपिणं सहस्रदलपंकजे सकलशीतरश्मिप्र

उ०न्या० भं वराभयकरांबुजंविमलगंधपुष्पांबरं प्रसन्नवदनेक्षणांसकलदेवतारूपिणींस्मरे
१४ छिरसिसततंतदभिधानपूर्वंगुरू एवंन्यासेकृतेदेविसाक्षात्परशिवोभवेत् मंत्रीन
चात्रसंदेहोनिग्रहानुग्रहक्षमः महाषोढाह्वयंन्यासंयः करोतिदिनेदिने देवाःसर्वे
नमस्यंतितंनमामिनसंशयः महाषोढाह्वयंन्यासंयःकरोतिहिपार्वति· दिव्यसेत्वं
समुद्दिष्टंसमंतादशयोजनं कृत्वान्यासमिदंदेवियत्रतिष्ठतिमानवः तत्रस्यादि
14 जयोलाभःसमान्यःपुरुषःप्रिये महाषोढाकृतन्यासतदज्ञंवंदतेयदि मासान्मृत्यु
मवाप्नोतियदिस्त्राताशिवःस्वयं दिव्यंतरिक्षभूशैलजलारण्यनिवासिनः उद्दंडभूत
वेतालदेवरक्षोग्रहादयः देवाःसर्वेपिकुर्वंतिऋषियोगीमुनीश्वराः बहुनोक्तेनकिंदे राम०
विन्यासमेनंममप्रिये नापुत्रायवदेद्देविनाशिष्यायप्रकाशयेत आज्ञासिद्धिमवा १४

प्रोतिरहस्मिन्यासमाचरेत अस्मात्परतरारस्मादेवताभावसिद्धये लोकेनास्तिनसंदेह
ः सत्यंसत्यंवरानने ऊर्ध्वाम्नायप्रवेशश्चपराप्रासादचिंतनं महाषोढापरिज्ञानंन
चाल्पतपसःफलं दिव्यौघेचादिनाथश्चतच्छक्तिश्चसदाशिवः तत्पत्नीचेश्वरस्तस्य
भार्यारुद्रश्चतद्वधः विष्णुश्चतत्प्रियाब्रह्मातत्कांताद्वादशेरिताः दिव्यौघेसनकश्चै
वसनंदनसनातनौ सनत्कुमारश्चसनत्सुजातश्चऋभुक्षजः दत्तात्रेयोरैवतकोवा
मदेवस्ततःपरं ततोव्यासःशुकश्चापिएकादशसमीरिताः मानवौघेनरसिंहश्चम
हेशोभास्करस्तथा महेंद्रोमाधवोविष्णुःषडेतेपरिकीर्त्तिताः नामांतेयोजयेद्देविदि
व्यौघैःपरमंशिवं महाशिवंचसिद्धौघेमानवौघेसदाशिवं देवतांपुरतोदेविगुरुपंक्ति
प्रपूजयेत पंक्तित्रयंक्रमेणाथध्यात्वासम्यगननाथीः षोडशैरुपचारैस्तुसांगं

उ०म्ना० सावरणं शिवं पूजयेन्मूलमंत्रेण गंधपुष्पाक्षतादिभिः महाघोराग्निताशेषपरिवा
१५ राश्च शांभवि प्रणवादिनमोंतेन तत्तन्नाम्ना समर्चयेत् वटुमंत्रं प्रवक्ष्यामि शृणुष्व
कुलनायिके तारात्रयं ततो देवीपुत्राया वटुकेति च नाथः स्यात्कपिलजटाभारभा
सुरपिंगल त्रिनेत्रे पि पदं पश्चाज्ज्वालामुखपदं ततः इमां पूजां वलिं गृह्ण युगपा
वकवल्लभा उक्तो वटुमनुश्चतुश्चत्वारिंशद्भिरक्षरैः वलिदानेन संतुष्टो वटुकः सर्व
15 सिद्धिदः शांतिं करोतु मे नित्यं भूतवेतालसेवितः तारत्रयं ततः सर्वयोगिनीभ्यः
पदं भवेत् पश्चात्तु सर्वभूतेभ्यः सर्वभूतादिवर्त्तिच वंदिभ्यो डाकिनीभ्यश्च शाकिनी
भ्यस्ततः पर त्रैलोक्येति पदं चैव वासिनीभ्य इमां वदेत् पूजां वलिं गृह्ण युग्मं स्वाहां एम०
तो योगिनीमनुः कथितो यं कुलेशानि एकपंचाशदक्षरः यो काचिद्योगिनी घोरसौ १५

भ्याघोरतरापरा खेचरीभूचरीव्योमचरीप्रीतास्तुमेसदा तारत्रयंवदेत्सर्वभूतेभ्यः
सर्वएवच पश्चाद्भूतपतिभ्योरुद्रउक्तः सप्तदशाक्षरः भूतायेविविधाकारादिव्याभौमां
तरिक्षगाः पातालतलसंस्थाश्चशिवयोगेनभाविताः ध्रुवाद्याःसत्यसंधाश्चापींद्रा
द्याश्चाव्यवस्थिताः तृप्यंतुप्रीतमनसः प्रीतागृह्णंत्विमंवलिं तारत्रयंवदेदेहियुग्मं
देविपदंततः पुत्रायवटुकनाथायपश्चादुच्छिष्टहारिणो गृह्णयुग्मंहुहुपदंक्षेत्रपा
लपदंततः सर्वविघ्नान्यपदंपश्चान्नाशयद्वितयंततः सर्वोपचारसहितामिमांपूजां
वलिंवदेत गृह्णयुग्मंद्विवांतोयंक्षेत्रपालमनुःप्रिये चतुःपंचाक्षरैः प्रोक्तःसर्वसि
द्धिप्रदायकः योस्मिन्क्षेत्रेनिनिवासीचक्षेत्रपालस्तुकिंकरः शीतोयंवलिदानेनसर्व
रक्षांकरोतुमे तारत्रयंवदेदाद्यंश्रीप्रासादपरामनुं ह्रांह्रींह्रूंचयुगांतेथभैरवाधिष्ठि

तायच असोम्यांनंदतःपश्चात्स्मिदुदयाभीष्टतःपरं॥सिद्धार्थपदमाभाष्यपश्चात्कुलै
१६ 16 रवतरद्वयं क्षेत्रपालपदंपश्चान्महाशान्महाशास्त्रपदंततः मातृपुत्रपदंपश्चात्कु
लपुत्रपदंभवेत् सिद्धपुत्रपदंवास्मिन्स्थानाधिपतयेततः अस्मिन्ग्रामाभिपयेस्मि
न्देशाधिपतयेततःमेघनादंपश्चात्प्रचंडोग्रपदंभवेत् कपालीभीमतत्पश्चाद्वीष
णेतिपदंभवेत् स्यात्सर्वविद्याधिपतयेइमांएजांवलिवेत् गद्धायुग्मंतुयुगंमुरुव
र्णाययुग्मकं ज्वलयक्वज्वलयुगंसर्वविघ्नंनिवारय नाशयद्वितयंसांसांतत्पश्चा
त्स्वमितीरयेत् क्षेत्रपालायवौषडंषव्युत्तरशताक्षरः तारत्रयंवदेपश्चादमुकक्षे
त्रपालच राजराजेस्वरइमांएजांवलिमतःपरं गद्धयुगंमद्धिठांतीरोरष्टाविंशति राम॰
भिःस्मृतः अनेनवलिदानेनवटुवर्गसमन्वितः राजराजेश्वरोदेवोमेप्रसीदतुस १६

र्वेदा पश्चिमे वटुकं देवमुत्तरे योगिनीवलिं पूर्वे भूतवलिं दद्यात क्षेत्रपाले च दक्षिणे
राजराजेश्वरं मध्ये पूजयेत्कुलनायिके अंगुष्ठानामिकाभ्यां तु वटुकस्य वलिः स्मृतः
तर्जनीमध्यमानामिकांगु योगिनीवलिः अंगुलीभिश्च सर्वाभिरुक्तो भूतवलिः प्रिये
अंगुष्ठतर्ज्जनीभ्यां तु क्षेत्रपालवलिर्भवेत् अंगुष्ठामध्यमाभ्यां तु राजाराजेश्वरस्य च
अथ प्रयोगः तत्र प्रातः कृत्यादि मातृकान्यासांते शिरसि ब्रह्मणे ऋषये नमः मुखे ज
गतीछंदसे हृदि श्रीमदर्द्धनारीश्वराय देवतायै नमः इति विन्यस्य मरुषोढान्यासे विनि
योग इति कृतांजलिः ॥ अंगुष्ठयोः ऐं ह्रीं श्रीं स्लौं स्हौं ईशानाय नमः तर्जन्योः स्लौं
स्हौं तत्पुरुषाय मध्यमयोः ३ स्लुं स्हिं वामदेवाय पादयोः सद्योजाताय म्रह्रिं स्लां स्हां
ईशानायोर्द्ध्ववक्त्राय मखे स्लं स्हं तत्पुरुषाय पूर्ववक्त्राय दक्षकर्णे स्लुं स्हुं अघोराय

उ०म्ना· दक्षिणवक्त्राय· वामकर्णे ल्लिं ल्लिं वामदेवायोत्तरवक्त्राय चोरुरूपे ल्लुं ल्लूं सद्योजातायप
१८ श्चिमवक्त्राय नम इति अंगन्यासः क्रमेणांगुष्ठादिपंचांगुलिभिरेकैकांगुल्यैकैकवक्त्रे
न्यस्तव्यः ततः ह्रां ह्रीं मित्यादिना कर षडंगन्यासं कृत्वा प्रणामोक्तं देवं ध्यात्वा न्यसे
त् तत्रादौ प्रपंचन्यासो यथा ४ ह्रौं ह्रैं अं प्रपंचरूपायै श्रियै नमः एवं ६ आं द्वि
परूपायै ६ इं जलधिरूपायै कमलायै ६ ईं गिरिरूपायै विष्णुवल्लभायै ६ उं पत्तन
17 रूपायै पद्मधारिण्यै· ऊं पीठरूपायै समुद्रतनयायै· ऋं क्षेत्ररूपायै लोकमात्रे ६
ॠं वनरूपायै कमलवासिन्यै· ऌं आश्रमरूपायै इंदिरायै· ॡं गहरूपायै मायायै
एं नदीरूपायै रमायै· ऐं चत्वररूपायै पद्मायै ओं उद्भिज्जरूपायै नारायणप्रियायै· राम·
स्वं त्रुटिरूपायै· उमायै· गं कलरूपायै चंडिकायै ओं स्वेदजरूपायै सिद्धलक्ष्म्यै· अं १८

अंडजरूपायै· रालक्ष्म्यै: आंजरायुजरूपायै महालक्ष्म्यै: कं लवरूपायै आर्यायै· खं
त्रुटिरूपायै: उमायै· गं कलरूपायै चंडिकायै घं काष्ठारूपायै दुर्गायै· ङं· निमेषरूपा
यै वै शिवायै· चं श्वासरूपायै अपर्णायै छं घटिकारूपायै अंबिकायै· जं मुहूर्त्तरू
पायै सत्यै· झं प्रहररूपायै ईश्वर्य्यै ञं दिनरूपायै शांभव्यै· टं संध्यारूपायै: ईशान्यै·
ठं रात्रिरूपायै पार्वत्यै· डं तिथिरूपायै मंगलायै· ढं वाररूपायै दाक्षायिण्यै· णं नक्ष
त्ररूपायै हैमवत्यै तं योगरूपायै महामायायै थं करणरूपायै महेश्वर्यै दं पक्षरू
पायै· मृडान्यै धं मासरूपायै रुद्राण्यै· नं राशिरूपायै शर्वाण्यै पं ऋतुरूपायै प
रमेश्वर्य्यै फं अयनरूपायै काल्यै बं वत्सररूपायै कात्यायन्यै भं युगरूपायै वीरायै गौ
र्य्यै मं प्रलयरूपायै भवान्यै· यं प्रपंचरूपायै ब्राह्म्यै रं पंचतन्मात्रारूपायै वागीश्वर्यै· लं

उ०न्मा पंचकर्मेंद्रियरूपायै वाराह्यै वं पंचज्ञानेंद्रियरूपायै सावित्र्यै परां पंचप्राणरूपायै
१८ सारस्वत्यै षं गुणत्रयरूपायै गायत्र्यै। सं मंत्रः करणचतुष्टयरूपायै हं त्र्यवस्था
त्रयरूपायै शारदायै लं सप्तधातुरूपायै भारत्यै क्षं दोषत्रयरूपायै विद्यात्मि
कायै नम इति मातृकास्थानेषु विन्यस्य ऐं ह्रीं श्रीं ह्सौं स्हौः अं ५० सकलप्रपंचाधि
देवतायै श्रीपरांवादेव्यै नमः स्हौः ह्सौः श्रीं ह्रीं ऐं ॐ नम इति सर्वांगे व्यापकं कुर्यादि
18 तिप्रपंचन्यासः अथ भुवनन्यासः तत्र पादयोः ॐ ऐं ह्रीं श्रीं ह्सौं स्हौः अं आं इं अ
तललोकनिलयशतकोटिगुह्याद्ययोगिनीमूलदेवताऽनंताधारशक्त्यांबादेव्यै न
मः गुल्फयोः ६ ईं उं वितललोकनिलयशतकोटिगुह्यतरअनंतयोगिनीमूल राम०
देवता जंघयोः ६ ऊं ऋं ॡं सुतललोकनिलयशतकोट्यतिगुह्याचिंत्ययोगिनी १८

म्लदेवतायतजान्वोः ६ ऌंएंऐंमहातललोकनिलयशतकोटिमहागुह्यस्वतंत्रयोगि
नीम्ल ऊर्वोः ६ ओंऔंतलातललोकनिलयशतकोटिपरमगुह्यछायायोगिनीम्
लास्फिचोः अंअः रसातललोकनिलयशतकोटिरहस्यज्ञानयोगिम्लावारे ६
कंपपाताललोकनिलयशतकोटिरहस्यतरक्रियायोगिम्· स्वाधिष्ठाने ६ चं ५ म्लो
कनिलराशतकोघतिरहस्यडाकिनीयोगिनीम्ल· मणिपूरके ६ वं ५ भुवर्लोकनिल
यशतंकोटिमहारहस्यराकिनीयोगिनीम्लअनाहते ६ तं ५ स्वर्लोकनिलयशतको
टिपरमरहस्यलाकिनीयोगिनीम्ल। विशुद्धौ ६ पं महर्लोकनिलयशतकोटिगुप्तका
किनीयोगिनीम्लआज्ञायां ६६ पं ४ जनलोकनिलयशतकोटिगुप्तरसाकिनीम्ल
·लाटेशं ४ तपोलोकनिलयशतकोटिगुप्तराकिनीयोगिनीम्लब्रह्मरंध्रेलंक्षंसत्यलो

उं०म्ना० कनिलयशतकोटिमहागुप्तयोकिनीमूलदेवताधाराशक्त्यंवादेव्यैनमइतिविन्यस्य
१९ ६ अं ५० सकलभुवनाधिपायेश्रीपरावादेव्यैनमः स्हौंः ह्सौंः श्रीह्रीऐं ॐ इतिव्यापकं
कुर्यादितिभुवनन्यासः अथमूर्त्तिन्यासः तत्रशिरसि ६ अंकेशवायायास्वरशक्त्येनमः
मुखे ६ आंनारायणायपाद्यशक्त्यै· दक्षांसे ६ इंमाधवायेष्टदायै· वामांसे ६ ईंगोविंदा
19 यै· शानायै· दक्षपार्श्वे ६ उंविष्णवेउग्रायै· वामेऊंमधुसूदनायोर्द्धनयनायै· दक्षकघो
६ ऋंत्रिविक्रमायक्रमड्यै· वामायांॠंवामनायरूपिण्यै· दक्षोरौ· लृंश्रीधरायजृंभायै·
वामोरौलॄंहृषीकेशायपलन्दोषायै· दक्षजानुनिएंपद्मनाभायैकनायिकायै· वामे
ऐं· वामेऐंदामोदरायेकारिण्यै· दक्षजंघायांओंवासुदेवायपोषवत्यै· वामायांओंस एम०
कर्षणायौर्वकायै· दक्षपादयंप्रद्युम्नायांजनप्रभायै वामेअः अनिरुद्धायास्थि १९

मालाधारिण्यै· दक्षपादाग्राद्गुल्फपर्यंतं ढंकंभंभवायकरभद्रायै· वामपादाग्राद्गुल्फ
लपर्यंतं खंवंशर्वायखगलायै· दक्षपार्श्वे गंफंरुद्रायगरिमलम्बदायै वामपार्श्वे घंपंपशु
पतयेघोरपादायै· दक्षदोर्मूलेङं· नंउग्रायप   नासायै· वामदोर्मूलेनंवंधंमहादेवाय
चंद्रार्द्धधारिण्यै कंठेछंदोर्मध्ये· वदनेजंथंईशानायजगत्स्थानायै· दक्षकर्णेभंतंतत्पु
रुषायभंकल्यै· वामनेत्रेग्रांअघोरायज्ञानदायै· भालेटंवंसद्योजातायटंकठक्कधरायै
शिरसिठंडंवामदेवायभंकृतिडामर्यै· मूलाधारेयंब्रह्मरूपस्थिरिण्यै· स्वाधिष्ठानेरं
मजायतेरेरंजिह्व्यैमणिपूरकेलंवेधसेलक्ष्म्यैअनाहतेवंपरमेष्ठिनेवज्रिन्यै· वि
विशुद्धौशंपितामहायशशिधरायै· आज्ञायांषंविधात्रेषडाधारलपायै· अर्द्धेन्दौसंवि
रंचयेसर्वनायिकायै· रोधिन्यांहंस्त्रष्ट्रेहसिताननायै नादेलंचतुःशतनायललितायै

उ०म्ना० नारांते स्हं हिरण्यगर्भाय: क्षमायै तमइत्येवं विन्यस्य ॐ ऐंह्रींश्री ह्सौंस्हौ: सकलत्रि
२० मूर्त्यात्मिकायै श्रीपुरांबादेव्यै नम: स्हौ: ह्सौ: श्रीह्रींऐं ओं इतिव्यापकं कुर्यादितिमू
र्त्तिन्यास: अथमंत्रन्यास: तत्रमूलाधारे ६ अंआंइं एकलक्षकोटिभेदप्रणवाद्येका
क्षरात्मकाखिलमंत्राधिदेवतायै सकलफलप्रदायै द्विकूटेश्वर्यैवादेवी: मणिपूरके
20 ६ अंअंत्रिलक्षकोटिभेदवह्न्यादित्र्यक्षरात्मत्रिकूटेश्वर्यैवादेव्यै· अनाहतेस्हंऐंऐं
चतुर्लक्षकोटिभेदचंद्रादिचतुरक्षरात्म· चतु:कुटेश्वविशुद्धौ· ओऔअंअ: पंचल
क्षकोटिभेदसूर्यादिपंचाक्षरात्म· पंचकूटे· आज्ञायांकंखंषट्लक्षकोटिभेदस्कंद
द्रादिषडक्षरात्म· षट्कूटे· विंदौघंटंचंलक्षकोटिभेदगणपत्यादिसप्ताक्षरासप्तकूटे· राम०
अईद्वौछंजंझंअष्टलक्षकोटिभेदवटुकाद्यष्टाक्षरात्मअष्टकूटेष्व· रोधिन्यांजंठंठं २०

नवलक्षकोटिभेदब्रह्माद्दिनवक्षरात्मनवकूटे· नादेडंढंणां दशलक्षकोटिभेदविष्ण्वादिद
शाक्षरात्मदशाकूटे· नादंतेतंथंदं एकादशलक्षकोटिभेदरुद्राद्येकादशाक्षरा· एकाद
शकूटे· शक्तौधंनयंद्वादशलक्षकोटिभेदवाराह्यादिद्वादशाक्षरा· द्वादशकूटेव्यापिका
यांफंबंमंत्रयोदशलक्षकोटिभेदलक्ष्म्यादित्रयोदशाक्षरात्रयोदशकूटेसमानास्थ
नेमंपंरंचतुर्दशलक्षकोटिभेदगौर्यादिचतुर्दशाक्षरात्मा चतुर्दशकूटेउन्मन्यांलवं
शंपंचदशलक्षकोटिभेदेदुर्गादिपंचदशाक्षरा पंचदशकूटे· ध्रुवमंडलेखंसंहंलंक्षं
षोडशलक्षकोटिभेदत्रिपुरादिषोडशाक्षरात्मकाखिलमंत्राधिदेवतायेषोडशकूटे
श्वपर्य्यवादेव्यैनमइतिविन्यस्य ॐ ऐंह्रींश्रीं ह्सौः स्हौः ऋं ५० सकलमंत्राधिदेवतायै
श्रीपरांवादेव्यैनमः स्हौः ह्सौः श्रीं ह्रीं ऐं ॠंइतिव्यापकंकुर्यादितिमंत्रन्यासः तत्रदक्ष

पादेदृ अंआंसहस्रकोटिऋषिकुलसेवितायैनिवृत्त्यंवादेव्यैनमः वामेद इंईंसहस्र
२१ कोटियोगिकुलसेवितायैप्रतिष्ठाम्वादेव्यै· दक्षगुल्फे उंऊंसहस्रकोटितपस्विकुलसेवि
द्यांवा· वामेऋंॠंसहस्रकोटिशांतकुलसेवितायैशांत्यंवादेव्यै· दक्षजंघायांऌंॡं
सहस्रकोटिमुनिसेवितायैशांत्यतीतांदेव्यै· वामायांएंऐंसहस्रकोटिदेवतकुलसेवि
21 तायै· हृल्लेखांवादेव्यै· दक्षजानुनिओंऔंसहस्रकोटिराक्षसकुलसेवितायैगगनांवा
देव्यैवामेअंअः सहस्रकोटिविद्याधारकुलसेवितायैरक्तांवादेव्यै· दक्षोरौ· कंखंसह
स्रकोटिसरकुलसेवितायैजयांवा· वामोरुमलेछंजंसहस्रकोटिगंधर्वकुलसेविता
यैजयांवाः दक्षपार्श्वेभंसहस्रकोटिगुह्यककुलसेवितायैअजितांवादेव्यै· वामेठं रम०
ठंसहस्रकोटियक्षकुलसेवितायैअपराजितांवादेव्यै· दक्षस्तनेडंढंसहस्रकोटिकि २१

न्नरकुलसेवितायै वामांवा। वामे णंतंसहस्त्रकोटिपन्नगकुलसेवितायै ज्येष्टांवा देव्ये·
दक्षदोर्मूले थंदंसहस्त्रकोटिपितृकुलसेवितायै रौद्रंवा देव्यैः वामे धनंसहस्त्रकोटिगणे
श्वरकुलसेवितायै मायांवा देव्ये· दक्ष भुजे पंफंसहस्त्रकोटि भैरवकुलसेवितायै कुंड
लिन्यंवा देव्ये वामे वंभंसहस्त्रकोटिवटुककुलसेवितायै काल्यंवा देव्ये· दक्षांसे मंयंस
हस्त्रकोटिक्षेत्रेशकुलसेवितायै कालरात्र्यंवा देव्ये वामे रंलंसहस्त्रकोटिप्रथमकुल
सेवितायै त्त्वाकर्त्र्यंवा देव्ये· दक्षकर्णे वंशंसहस्त्रकोटिब्रह्मकुलसेवितायैः सर्वेश्व
र्यंवा देव्ये वामे षंसंसहस्त्रकोटिविष्णुकुलसेवितायै सर्वज्ञांवा देव्ये· भाले हंलंसह
स्त्रकोटिरुद्रकुलसेवितायैः सर्वकर्त्र्यंवा देव्ये· ब्रह्मरंध्रे क्षंसहस्त्रकोटिचराचर
कुलसेवितायै कुलशक्त्यांवा देव्ये नमः इति विन्यस्य ६ अं ५० समस्तदेवताधिपायै

उ० म्ना० श्रीपरांवादेव्यैनमः सस्हौंः रस्लौंः श्रींह्रींऐंश्रोंइतिव्यापकंकुर्यादितिदेवतन्यासः॥ ॥
२२ अथमातृकान्यासः॥ ॥तत्रमूलाधारे ६ कं४ अनंतकोटिभूचरीकुलसहितायैअं
क्षांमंगलांवादेव्यैआंसांब्रह्माण्यंवादेव्यैअनंतकोटिभूतकुलसहितायअंक्षंमं
गलयोनायअंक्षंअसितांगभैरवायनमः स्वाधिष्ठाने ६ वं४ अनंतकोटिखेचरीकु
22 लसहितायैईलांरचिंकांवादेव्यैईलांमाहेश्वर्यंवादेव्यैअनंतकोटिवेतालकुलसहि
तायइंलंवर्चिकनाथायइंलंरुरुभैरवायमणिपूरके ठं४ अनंतकोटिपातालचरीकु
लसहितायैउंहांयोगेश्वर्यंवादेव्यैउंहांकौमार्यंवादेव्यै अनंतकोटिपिशाचकुल
सहितायाउंहंयोगेश्वरनाथायउंहंचंडभैरवाय· अनाहते ६ तं४ अनंतकोटिदिक्च एम०
रीकुलसहितायैऋंसांहरसिद्धांवादेव्यैऋंसांवैष्णव्यंवादेव्यैअनंतकोटिअपस्मारकु २२

लसहितायक्रंसंहारसिद्धनाथायक्रंसक्रोधभैरवायविशुद्धे ६५४ अनंतकोटिसहचरीकुलसहितायैस्हंषांभद्रिन्यंवादेव्येस्हंषांवराह्यंवादेव्ये अनंतकोटिब्रह्मराक्षसकुलसहितायल्हंषंभद्रिनाथायस्हंषंउन्मत्तभैरवाय· आज्ञायां ६यं२ अनंतकोटिगिरिचरीकुलसहितायैऐंशांकिलिकिलांवादेव्येऐंशांइंद्राण्यंवादेव्ये· अनंतकोटिचेटककुलसहितायऐंशंकिलिकिलनाथायऐंशंकपालिभैरवायः भाले ६शं२ अनंतकोटिवनचरीकुलसहितायैओंवांकालरात्र्यंवादेव्येओंवाचामुंडांवादेव्ये अनंतकोटिप्रेतकुलसहितायओंवंकालशक्तिनाथायओंवंभीषणभैरवायब्रह्मरंध्रे ६ लंक्षं अनंतकोटिजलचरीकुलसहितायैअः लांभीषणांवादेव्येअः लांमहालक्ष्म्यंवादेव्ये अनंतकोठिकूष्मांडकुलसहितायैअंलंभीषणनाथायअंलंसंहारभैरवायनमइतिवि

उ०म्ना० न्यस्य ६ क्षं ५० समस्तमातृभैरवाधिदेवतायै श्रीपरांबादेव्यै नमः स्हौं स्हौः श्रीं ह्रीं ऐं
२३ ॐ इति व्यापकं कुर्यादिति मातृकान्यासः॥ ॥इति महाषोढान्यासः॥ ॥ततः एवं
कर षडंगन्यासं विधाय पूर्वोक्तरूपं देवं स्वभावेन ध्यात्वा योनिलिंगधेनुकपालगा
नत्रिशूलपुस्तकवनमालानमस्कारमहामुद्राख्या दशमुद्रा विरच्य शिरसि श्रीगु
23 रुं सहस्रदलपंकजे इत्यादिश्लोकोक्तरूपं ध्यात्वा तद्दिक्षया तत्पादुकां शिरसि वि
न्यस्य प्रणाम्य स्वसंकेतनाम मूलाधारे विन्यस्य शिवरूपमात्मानं ध्यात्वा महाषो
ढान्यासमाहात्म्यं पूर्वोक्तं स्मरेदिति महाषोढान्यासं विधाय योगपीठन्यासांते मूले रम०
न प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे जगती छंदसे हृदि श्रीमद २३
र्द्धनारीश्वराय देवतायै नमः इति विन्यस्य ह्लां ह्लीमित्यादिना करषडंगन्यासं कृत्वा

प्रणामोक्तरूपं देवं ध्यात्वा मानसोपचारैः संपूज्य त्रिकोणगर्भमष्टदलकमलं कृत्वा तद्ब
हिः षड्विंशतिदलं तद्बहिः षोडशदलं तद्बहिरष्टत्रिंशद्दलं तद्बहिश्चतुर्दशदलं तद्बहिरेक
मलं कृत्वा तद्बहिः षड्विं पंचाशद्दलमिति पूजाचक्रं चतुरश्रोपेतं निर्माय तत्र मूलेन पुष्पां
जलिं दत्वा प्रागवत्पात्रस्थापनादि पुष्पोपचारांते ह्सां ह्सीमित्यादिना षडंगं संपूज्य त्रिको
णाष्टदलयोरंतराले पंक्तित्रये णोर्ध्वाम्नायगुरूंस्तद्दिव्यसिद्धमानवक्रमेण ध्यात्वा प्रथम
रेखायां दिव्यौघेभ्यः पराख्येभ्यो गुरुभ्यो नम इति पुष्पांजलिं दत्वा ॐ ऐं ह्रीं श्रीं आदिना
थपरशिवाय नमः एवं आदिशक्तिपरशिवायै ४ सदाशिवपरशिवाय ४ सदाशिवा
परशिवायै· ईश्वरपरशिवाय· ईश्वरीपरशिवायै· रुद्रपरशिवाय· रुद्राणीपरशिवायै·
विष्णुपरशिवाय· वैष्णवीपरशिवाय ब्रह्माणीपरशिवायै नम इति इति संपूज्य द्विती

यरेखायां सिद्धौघेभ्यः पराख्येभ्यो गुरुभ्यो नमः ॐ ऐं ह्रीं श्रीं सनकमहाशिवाय नमः ४
सनंदनमहाशिवाय ४ सनातनमहाशिव ४ सनत्कुमारमहाशिवाय॰ सनत्सुजातम
हाशिवाय ऋभुमहाशिवाय दत्तात्रेयमहाशिवाय॰ रैवतकमहाशिवाय वामदेवम
हाशिवाय॰ व्यासम॰ शुकमहाशिवाय नम इति संपूज्य तृतीयरेखायां ४ मानवौघेभ्यः
पराख्येभ्यो गुरुभ्यो न इति पुष्पांजलिं दत्वा नृसिंह सदाशिवाय॰ महेश सदाशि॰ भास्क
र सदा॰ महेंद्र सदाशिवाय॰ माधव सदा॰ विष्णु सदाशिवाय नम इति संपूज्य ततः सर्वबा
ह्यगतैकपंचाशद् लकमले ४ एकपंचाशद्दलपद्माय नम इति पुष्पांजलिं दत्वा ततो
देवं यद्दलमारभ्य ॐ ऐं ह्रीं श्रीं क्लीं॰ स्हौः॰ अप्रपंचरूपायै श्रियै नमः ६ अद्वैपरूपा
यैसायायै नमः एवं प्रपंचन्यासोक्तैकपंचाशद्देवता वामावर्त्तेन संपूज्य ६ ॐ ऐं ह्रीं

सौंस्हौंः अं ५० सकलप्रपंचाधिदेवतायै परांबादेव्यै नमः स्हौंः श्रीं ह्रीं ऐं ॐ इति पुष्पां
जलिं दत्वा ६ अभीष्टसिद्धिमित्यादि श्लोकं पठित्वा पुष्पांजलिं दत्वा प्रपंचदेवतामय
त्वाय श्रीमदर्द्धनारीश्वराय नमः इति प्रणामेत् ततश्चतुर्द्दशदलपद्माय नमः इति पु
ष्पांजलिना संपूज्य देवाग्रमारभ्य ६ अं आं इं अतललोकनिलये इत्यादि शक्त्यं बा
देव्यै नमः इत्येवं भुवनन्यासोक्तचतुर्द्दशदेवता वामावर्त्तेन संपूज्य ६ शमस्तमातृका
मुख्यार्थसकलभुवनाधिपायै श्रीपरांबादेव्यै नमः स्हौंः स्हौंः श्रीं ह्रीं ऐं ॐ इति पुष्पां
जलिं दत्वा प्राग्वद्द्वितीयावरणपूजां समर्प्य ततः ६ अष्टत्रिंशद्दलकमलाय नमः इ
ति पुष्पांजलिं दत्वा ६ अं केशवाय आकारशक्त्यै नमः इत्यादि मूर्त्तिन्यासोक्ता अष्टत्रिं
शद्देवता वामावर्त्तेन संपूज्य ६ अं ५० सकलत्रिमूर्त्यात्मिकायै श्रीपरांबादेव्यै न

उ०म्ना० मः स्हौः ह्सौः श्रीं ह्रीं ऐं इति पुष्पांजलिं दत्वा प्राग्वत्तृतीयावरणपूजां समर्प्य ततः षो
२५ डशदलपद्माय नमः इति प्राग्वत्संपूज्य तत्रैव ६ अं आं ई एकलक्षकोटिभेद इत्यादिए
ककूटस्थवर्यवादेव्यै नमः इत्येवं वामावर्त्तेन षोडश देवताः मंत्रन्यासोक्ताः संपूज्य
६ अं ५० सकलमंत्राधिदेवतायै नमः स्हौः ह्सौः श्रीं ह्रीं ऐं ३० इति प्राग्वत्संपूज्य प्रा
25 ग्वच्चतुर्थावरणं समर्प्य षड्विंशतिदलपद्माय नमः इति पुष्पांजलिं दत्वा ६ अं आं स
हस्रकोटीत्यादिनिहत्यंवरदेव्यै नमः इति देवतन्यासोक्ताः षड्विंशति देवताः संपू
ज्य ६ अं ५० समस्तदेवताधिपायै श्रीपरांबादेव्यै नमः इति प्राग्वत्संपूज्य प्राग्वत्पं
चमावरणं समर्प्य ततः ६ अं ८ दलकमलाय नमः इति प्राग्वत्संपूज्य ६ अं ५० स राम०
मस्तमातृभैरवाधिदेवतायै श्रीपरांबादे अनंतकोटिभ्रचरीत्यादि असितांग २५

भैरवायनमइत्येवंमातृकान्यासोक्ताअष्टदेवताःसंपूज्य ६ अं ५० समस्तमातृभै
रवाधिदेवतायैश्रीपरांबादेव्यैनमइतिपुष्पांजलिंदत्वाप्राग्वत्षष्ठावरणंसमर्प्य
ततश्चतुरस्रेलोकपालांस्तदस्त्राणिचसंपूज्यधूपादिविधायनित्यहोमंतत्पूजा
चक्रस्यपश्चिमभागेचतुरस्रान्तत्रिकोणात्मकंमंडलंविरच्यतत्रवटुकमंत्रेण
तमावाह्यगंधाद्यैरुपचारैःसंपूज्यतत्रसान्नव्यंजनजलपूर्णंसाधारंवलिपात्रं
निधायऐंह्रींश्रींदेवीपुत्रवटुकनाथपिंगलजटाभारभासुरपिंगलत्रिनेत्रज्वाल
मुखइमांपूजांवलिंगृह्णगृह्णस्वाहेतिमंत्रेणवामांगुष्ठानामिकाभ्यामर्घोदक
धारदानेनवलिमुत्सृज्यवलिदानेनसंतुष्टइत्यादिमंत्रेणपुष्पांजलिंदत्वाउत्त
रतयैवमंडलंकृत्वायोगिनीमंत्रेणतथैवसंपूज्यतत्रप्राग्वद्वलिपात्रंनिधाय

उ०म्ना०
२६

26

ऐं ह्रीं श्रीं सर्वयोगिनीभ्यः सर्वभूतवर्त्तिनीवंदिनीभ्यो डाकिनीभ्यः शाकिनीभ्यस्त्रैलो
क्यवासिनीभ्यः इमां पूजां बलिं गृह्ण गृह्ण स्वाहेति वाम तर्ज्जनीमध्यमानामाभिर्यो
न्याकारेण एवं बलिमुत्सृज्य या काचिद्योगिनी घोरेति मंत्रेण पुष्पांजलिं सम
र्प्यः ततः पूर्वं तथैव मंडलं विधाय तत्र सर्वभूतमंत्रेण पूर्ववद्गंधादिभिः संपूज्य
तत्र बलिपात्रं निधाय ऐं ह्रीं श्रीं सर्वभूतेभ्यः सर्वभूतपतिभ्यो नम इति मंत्रेण वा
मांगुलिभिः प्रागवद्बलिमुत्सृज्य भूता ये विविधाकारा इति मंत्रेण पुष्पांजलिं दत्वा
ततो दक्षिणे तथैव मंडलं कृत्वा तत्र क्षेत्रपालमंत्रेण संपूज्य प्रागवलिपात्रं नि
धाय ॐ ऐं ह्रीं देहि देवीपुत्राय वटुनाथाय उच्छिष्टहारिणे गृह्ण गृह्ण रुरु क्षेत्र एम०
पालसर्वविघ्नान्नाशय सर्वोपचारसहितामिमां पूजां बलिं गृह्ण गृह्ण स्वाहेति २६

मंत्रेणावामांगुष्ठतर्ज्जनीभ्यां पूर्व्ववद्बलिमुत्सृज्ययोस्मिन्क्षेत्रेनिवासी चेतिमं
त्रेपुष्पांजलिंसमर्प्योथवा ऐंश्रींह्रींक्लौंः ह्रांह्रींह्रूं ह्रांह्रींह्रूं भैरवाधिष्ठितायाक्षोभ्या
नंदोदयायाभीष्टसिद्ध्यर्थंमवतरावतरक्षेत्रपालमहाशास्त्रमातृपुत्रकुलपुत्र
सिद्धपुत्रास्मिन्स्थानाधिपतये अस्मिन्ग्रामाधिपतये अस्मिन्देशाधिपतयेमेघ
नादप्रचंडोग्रक्रूपाणभीमभीषणसर्व्वविघ्नाधिपतये इमांपूजांबलिंगृह्ण गृह्ण
हुरुहुरुमुरुचूर्णायचूर्णायज्वलज्वलप्रज्वलप्रज्वलसर्व्वविघ्नान्निवारयनाशय
नाशयक्षां क्षीं क्षूं क्षेत्रपालायवौषट् ॐ इतिमंत्रेणावापूर्व्ववद्बलिमुत्सृजेत त
तश्चाग्नेयकोणभागुन्मंडले राजराजेश्वरमावाह्यगंधादिभिः संपूज्यतत्रमा
षबलिपात्रंनिधाय ऐंह्रींश्रीं अमुकक्षेत्रपालराजराजेश्वर इमांपूजांबलिंगृ

उ० म्ना० ह्स्ख्फ्रें ह्सौः स्वाहेति मंत्रेणांगुष्ठमध्यमाभ्यामर्घोदकधारादानेन बलिमुत्सृज्याते
२७ नबलिदानेनेति मंत्रेण पुष्पांजलिं दत्वा नीराजनादिकं शेषं प्राग्वत्समापयेदि
ति तथा मंत्री विशुद्धहृदयः पूर्वोक्तनियमान्वितः श्रीप्रासादपरामंत्रं तत्वसं
जपेत्प्रिये दशांशं जुहुयाद्धविसंस्कृते हव्यवाहजे गंधपुष्पाक्षताकल्पधेनु
27 वस्त्रादिभिः प्रिये भक्ष्यभोज्यान्नपानाद्यैः कुलद्रव्यैर्मनोहरैः तोषयेद्योगिनी
चक्रं यथाविभवविस्तरं एवं न्यासजपध्यानसहोमार्चनतर्प्पणैः मंत्री सिद्धम
नुर्देवि साक्षात्परशिवो भवेत ततः स्वमतसोभीष्टान्प्रयोगान्कुलनायिके मंत्रेणा
तेन मतिमान्साधयेद्भुक्तिमुक्तये सिद्धमंत्रस्य सिद्ध्यंति षट्कर्माणि न संशयः नै एम०
व सिध्यंत्यसिद्धस्य देवताशापमाप्नुयात काम्यप्रयोगकर्तॄणां परलोके न विद्यते प्र २७

योगसिद्धिरेवैषां फलमन्यत्र च प्रिये एकस्यापि विधानस्य न कुत्रापि फलद्वयं दे
वेशि दृश्यते तस्मान्निः कामो देवतां भजेत् होमतर्पणयंत्राद्यैर्ताना ध्यानविशेष
जैः आत्मनश्च परस्यापि षट्कर्माणि समाचरेत् प्रयोगांते चक्रएजां तिथिनैव
समाचरेत् एवं लक्षं जपेन्मंत्रं ध्यानन्याससमन्वितः प्रयोगदोषशांत्यर्थमात्म
रक्षार्थमेतच्च न चेत्फलं च नाप्नोति देवताशापमाप्नुयात् तिथिवारर्क्षकरणयो
गमासर्तुपक्षकं द्वीपेशकूर्मचक्रादि ज्ञात्वा कर्माणि साधयेत् पंचसुध्यासनं
मारणमंत्रन्यासा स्वमालिकाः दोषसंस्कारमुद्रादीन् ज्ञात्वा मंत्राणि साधयेत्
द्विषद्धाधववद्गणस्व्यराशिवर्णानुकूलता भूतमैत्रीमथाद्यंतं ज्ञात्वा मंत्राणि सा
धयेत् मंत्रविद्याभेदनिद्राचोधा। मौसोमरूपकं पंस्त्रीतपुंसकादिं च ज्ञात्वा मं

उ०म्ला० त्राणिसाधयेत् अथनाममन्दिरवर्णनाडीतत्वानुसंगतिं देवताकालमुद्रादीनज्ञा
२८ त्वाकर्माणिसाधयेत् साध्यासाधककर्माणिलेखद्रव्यपंचकं स्थानंयंत्रप्रमाणंच
ज्ञात्वायंत्राणिसाधयेत् उत्पत्तिरसनावर्णमूर्त्तिसंस्कारसंस्थितिं कुंडद्रव्यप्रमा
णादीनज्ञात्वाहोमंसमाचरेत् धामप्रभाधूमवर्णध्वनिगंधाग्निपाकृतिं दूतचेष्टा
28 दिकंज्ञात्वाकथयेत्शुभाशुभं मंत्रतत्वानुसंधानंदेहावेशादिलक्षणं संचोच्चा
रणभेदंचज्ञात्वामंत्राणिसाधयेत् मंडलंकालशक्त्योरंकंगंधाष्टकादिकंदीक्षा
नामप्रदानादिज्ञात्वादीक्षांसमाचरेत् नित्यंनैमित्तिकंकाम्यंनियमंनामवासना
पूजाधारणायंत्रादिज्ञात्वाकर्माणिसाधयेत् पूजागृहप्रवेशादिकुलपूजकल राम०
क्षणं कुलद्रव्यादिसिद्धिंचज्ञात्वापूजासमाचरेत् अंतर्यागंवहिर्यागमर्घ्यादि २८

मतर्पणयोः स्वाहान्यासजनयोर्नमः मंत्रांतेयोजयेन्मंत्री जपकालेयथास्थितं
शांतिकेराजतंताम्रंमर्जपश्चेत्तुवश्यके सर्वकार्येषुसौवर्णंक्रूरेस्यात्प्रेतकर्पटं त्रि
गंधंशांतिकेप्रोक्तंपंचगंधंतुवश्यके सर्वकार्येषुगंधःस्यात्क्रूरेचाष्टविषाणिच
शांतिकेलेखनीदूर्वावश्यादौशिखिपिच्छिका हेम्नासर्वाणिकार्याणिक्रूरेस्यात्काक
पिच्छिका गृहेतुशांतिकंस्याद्वश्याद्यंचंडिकालये सर्वकार्यंदेवगृहेश्मशानेक्रू
रकर्मेच लक्षणान्येवमादीनिज्ञात्वागुरुमुखात्प्रिये सर्वकर्माणिकुर्वीतमंत्री
तत्फलाप्तये मूलेप्रासादबीजंतमरुणायुतसन्निभं उत्तमांगेपराबीजंचंद्रायु ग्र०
तसमप्रभं परस्यारकारस्यशंज्वालितानंदनिर्भरैः मूलादिब्रह्मरंध्रांतमनव २९
च्छिन्नरूपिभिः परमृतरसासेकैः सिक्तमापादमस्तकंआत्मानंभावयेन्नित्यंस

29 स्थापनार्चनं पंचपुष्पांजलिं देवि ज्ञात्वा पूजां समाचरेत पात्राधारादिपिशितं
कुलमेलनतर्पणं वटुकादिवलिं देवि ज्ञात्वा पूजां समाचरेत कुलाकुलाख्यास
सृजा शक्तिभेदं च लक्षणं शुभलक्षणसंयुक्तं स्त्रीसंस्कारार्चनादिकं देवि संभोग
कालं च ज्ञात्वा शक्तिं परिग्रहेत इत्याद्याः कथिताः केचिद्विशेषाः कुलनायिके
सर्वेषामपि मंत्राणां विधिः साधारणक्रमः मंत्राः फट्देवताहुंफडंताः प्राणे च
दक्षिणे प्रवुध्यंते द्विठंताः स्युर्विद्याः स्त्रीदेवताः प्रिये वामप्राणप्रवुध्यंते नमों
ताः स्युर्नपुंसकाः नाडीद्वयगते प्राणे सर्वे वोधं प्रयाति च शांतिमनवः सौम्या
भूयिष्टा नमन्ता दराः स्वाहांताः स्युर्वियत्सा क्षाद्वाग्नेयाः क्रूरकर्मसु फडुक्ता
च्छेदे वषट्वश्ये हुं द्वेषे स्यच मारणे। स्तंभने च मनः प्रोक्तं स्वाहा शांतिकपौष्टिके स

भयेदजरामरः एवंध्यात्वाकुलेशानिसर्वकर्माणिसाधयेत् सिध्यंतितरसा
देविनात्रकार्याविचारणा ध्यानभेदंप्रवक्ष्यामिसर्वसिद्धिकरंप्रिये ईप्सितंलभ
तेयेनपूजाहोमादिकंविना स्थानेमातोहरेदेविसाधकःस्थिरमानसः स्थित्वाम्
द्वासनेध्यायेद्गुरुवंदनपूर्वकं मस्तकस्थितसंपूर्णचंद्रमंडलमध्यमे श्रीमासा
रूपाणवीजंषोडशस्वरसंयुतं मुक्तास्फटिककर्पूरकुंदेंदुधवलंप्रिये सचंद्रविंब
संजातसुधाप्लावितविग्रहं आत्मानंभावयेद्देविनिश्चलेनांतरात्मना श्रीमासा
रूपामंत्रमष्टोत्तरसहस्रकं तद्गुणोल्लासहितोमंडलंप्रजपेत्प्रिये अपमृत्युम
हारोगजरामरणजंभयं ग्रहापस्मारवेतालभूतोन्मादादिजंभयं जित्वाधिव्याधि
रहितःपुत्रपौत्रसमन्वितः जीवेद्वर्षशतंसाग्रंपूजितःसर्वमानवैः अक्षतंवुध्य

उ०म्ना० तेशास्त्रंकवितानिर्मलाभवेत् चिंतायोजायतेसासान्नात्रकार्याविचारणा ज्वरोन्म
३० हादिरोगेषुजपेच्छिरसिसिंचयेत् शूलवातव्रणग्रंथिमस्तकाक्ष्यादिसंभवैः तत्र
त्स्थानेषुदेवेशिएवंवच्चिंतयन्जपेत् महारोगेषुजातेषुसर्वांगेषुविचिंतयेत् तत
30 स्रणाच्छांतिमायांतिरोगाःसर्वेनसंशयः दशेंद्रियेषुयोध्यायेल्लभेद्रियसौष्ठवं य
त्रबीजंस्मरेत्तत्रतत्फलंभवतिध्रुवं सदासंचिंतयेन्मूर्द्धिसभवेदजरामरः सर्वरो
गहरंविंद्यादारोग्यंचपरंप्रिये अस्मात्परतरंध्यानंनास्तिसत्यंनसंशयः सात्वि
कंध्यानजंदेविफलमेतदुदीरितं शांतिकर्मणिविधिनाध्यानेनातेनसाधयेत्
द्वादशाधारपद्मेषुद्वादशवरसंयुतं बीजंसंचिंतयेद्यस्तुसभवेदजरामरः षडाधा राम०
रेषुषड्दीर्घयुतंबीजंविचिंतयेत् षडाधारस्थदेवीभिःपूज्यतेकुलनायिके ॥ ३०

त्र्यस्रकर्णिकामध्ये सूर्यमंडलसंस्थितं पराप्रासादवीजं तदहरणारुणसंनिभं जया
वंधूकसिंदूरपद्मरागप्रभोज्वलं पंचविंशतिभिः स्पर्शाक्षरैरावीतमंविके तत्प्रभा
पटलच्छायारक्तीकृतजगत्त्रयं आत्मानं संस्मरेद्देवि निश्चलेनांतरात्मना पराप्रा
सादवीजं तं यौवनोल्लाससंयुतं अष्टोत्तरसहस्रं तु मंडलं प्रजपेत्सुधीः देवदान
वगंधर्वसिद्धगुह्यककिन्नरान् विद्याधरान्मुनीन्यक्षानन्यानप्यशरःस्त्रियः सि
घव्याघ्रोरगेंद्राद्दीनन्याढुष्टमृगानपि वशीकरोत्यसंदेहः किंपुनर्मानवादिकान्
मदेश्वर्यमाप्नोति स्वर्गभोगादिकं प्रिये यस्यमन्त्रं स्मरन्नजप्यात्सवश्यो जाय
ते चिरान् राजसध्यानजं देवि फलमेतदुदीरितं वश्यकर्माणि सर्वाणि विधिना
नेन साधयेत् सर्ववश्यकरं देवि सर्वैश्वर्यफलप्रदं अस्मात्परतरं ध्यानं नास्ति स

उ०म्ला० त्यंनसंशयः मूलाधारसरोजांतर्वह्निमंडलमध्यगं पराप्रासादवीजंतंकालांताग्नि
३१ समप्रभं प्रतिलोमेरक्तसंपीतंदशभिर्व्यापकाक्षरैः स्वयंजल्पानलः सम्यक्सर्वभूत
भयंकरः दक्षिणाशाविनमुखश्चोग्रदृष्टिर्मलोमसः यौवनोल्लाससहितः पराप्रासा
दसंज्ञकं मंत्रंतुमंडलंजप्यादष्टोत्तरसहस्रकं अनिष्टकारिणसलान्केलरूपास
31 कारिणः इत्याद्युपकारान्क्रूरान्सपर्याविघ्नकारिणः भूतोयग्रहवेतालपिशाचब्र
ह्मराक्षसान् तद्वह्निमध्यपतितान्निर्दग्धांश्चविचिंतयेत् क्षणेननाशमायांतिश
रभाइवपार्वति यस्यमूर्द्धिंस्मरेद्वीजंसमृत्युमधिगच्छति ध्यानेनानेनदेवेशिका
लादीनपिनाशयेत् ग्रहरोगादिदुष्टादिविनाशनकरंप्रिये अस्मात्परतरंध्यानं राम०
नास्तिसत्यंनसंशयः तामसध्यानजंदेविफलंमेतदुदीरितं दुष्टमारणकर्मो ३१

विधिनानेन साधयेत् इत्यादिध्यानभेदांश्च ज्ञात्वा गुरुमुखात्प्रिये षट्कर्माणि मयं
जीतनान्यथा वीरवंदिते खदिराश्वत्थमंदारारास्तताभानुसमिद्वरैः पनसोडुंबराश्वत्थ
प्लक्षायामार्गसद्वरैः नंद्यावर्त्तसितांभोजमयाद्रिकुसुमादिभिः सितैरन्यैः शुभ
द्रव्यैः शमित्यत्रफलार्त्तवैः भस्मैश्च पापसेदूर्वासहविभिन्नतंदुलैः मधुरत्रयसं
युक्तैर्मंत्रविकुलनायिके एकेनवाथसर्वैर्वा तत्कार्यं गुरुलाघवं जाप्यं देवि सहस्र
स्नं वा त्रिसहस्रं तु पंच वा। अयुतं नियुतं वापि प्रयुतं वा कुलेश्वरि तत्क्रमोदिते कुं
डे संस्कृते हव्यवाहते आवाह्य देवतामस्मिन् ध्यात्वा सावरणां प्रिये विधिवज्जुहु
याद्देवि तद्गतेनांतरात्मना सर्वरोगज्वरोन्मादापस्मारोत्यातकृत्यजं सर्वदुःखं प्रश
मयेत्सम्यान्नात्र संशयः अनेन सर्वशांतिश्च विद्याज्ञानं लभेत्प्रिये कदंबाशो

उ० म्ना० शोकवकुलपुन्नागाम्रमधुकजैः चंपकद्वयपालाशपाटलश्रीकपित्थजैः मालती
३२ मल्लिकाजातिवंधूकारुणपंकजैः कल्हारारुणमंदारजातिकुंदजपादिभिः रक्तैरन्यैः
शुभद्रव्यैः समित्पत्रफलान्वितैः एवं वश्यं कुर्याद्वै विविधिवन्मंत्रवित्तमः महीपती
32 स्वपुरुषान्कांतायौवनगर्विताः सिंहान्मत्तगजान्व्याघ्रान्सर्पान्दुष्टमृगानपि सि
द्धदेवाप्सरोयक्षगंधर्ववनिता देवानपि कुलेशानितरशायेन्नात्र संशयः राजी
लवणहोमेन त्विमाकर्षयेद्ध्रुवं विधिविधानेन देवेशि सौभाग्यमतुलं भवेत् पीत
द्रव्यैर्हरिद्राद्यैः समित्पत्रफलान्वितैः गृहधूमचितांगारत्रिकटूग्निविषांजनं
उन्मत्तरससंसिक्तं पिष्ट्वा सम्यक्प्रसेवितैः साध्यपादरजोभिश्च चिताभस्मस राम०
मन्वितैः साध्यमतिक्षतिं कुर्यादेकांत सत्रहसजा सम्यक्प्रतिष्ठिप्राणां कुंडस्यो ३२

परिलंबयेत् खनेन्मृत्स्नातिमांमंत्रीकुंडस्याधोयथाविधि मलीमसेनमनसाउग्र
दृष्टिरमर्षणः चितानलेविषतरुन्मत्तकाष्ठसमेधिते तद्द्रव्यैर्जुहुयाद्देवि विधि
वन्मंत्रवित्तमः कुर्याद्विद्वेषणोच्चाटमारणानिनसंशयः शांतिकेसात्विकेदेवि
श्वेतवर्णंविचिंतयेत् वश्येतुराजसंदेविरक्तवर्णंविचिंतयेत् आतारसांपुट
कृत्वापश्चात्कर्माणिसाधयेत् तामसेतमसंदेविकृष्णवर्णंविचिंतयेत् योन्य
थाकुरुतेमोहात्सभवेद्देवतापशुः तस्माद्देव्यामथन्यासंकारयेत्तुवलिंसुधीः
कृत्वाकर्माणिकुर्वीतनान्यथावीरवंदिते लिखेत्त्रिकोणषट्कोणमष्टारंचमही
पुरं मूलमंत्रंलिखेन्मध्येसाध्यनामसमन्वितं षट्कोणेषुषडंगानिविलिखेत्पर
मेश्वरि केशरेषुस्वरानष्टौवर्गान्यत्रेषुपार्वति भूगृहेषुचतुष्कोणेषालिखेन्मू

उ० म्ना० ल्मंविके पंचवर्णैरजोभिस्तम्रमहृष्टिमनोहरं एवंयंत्रंसमालिख्यविधिवन्मंत्र
३३ वित्तमः एकत्रिपदशचतुःकलशांस्थापयेत्प्रिये मध्यादिचतुरश्रांतंद्वाविंशतिघट
न्क्रमात् अथवाअष्टदलेदलेदेविदशवासप्रवाप्रिये चतुरोवाप्यथैकंवाकु
33 र्यात्साधकशक्तितः अस्थिरत्नंशिरातंतुर्मन्मांसंरुधिरंजलं चर्मवस्त्रशिखा
र्चनालिकेरफलंशिरः मंत्रप्राणसमायुक्तंजपेत्कलशदेवतां सांवत्रिमूर्त्तिरंशा
तिमातरोभैरवान्विताः विदिक्षुगुरुविघ्नेशदुर्गाक्षेत्रपतीन्प्रिये कलशेषुसम
भ्यर्च्यविधिवन्मंत्रवित्तमः अभिषिंचेत्प्रियंशिष्यंसर्वपापप्रशांतये आयुः
श्रीकांतिसौभाग्यविद्यारोग्यादिकंभवेत् राज्याभिषिक्तोलभतेचतुःसागरगां राम०
महीं अकिंचनोभिषिक्तस्तुमहदैश्वर्यमाप्नुयात् वंध्याभिषिक्तालभतेपुत्र ३३

सर्वगुणान्वितं भूतापमृत्युरोगाद्यावितश्यंतिनसंशयः त्रिलोदेवापिभूर्जेवा
लिखित्वायंत्रमुत्तमं विधृतंवाऊनारेविसर्वरक्षाकरंभवेत् आयुरारोग्यमैश्व
र्यविद्यालाभयशोजयं पराप्रासादमंत्रज्ञेदृश्यंतेनात्रसंशयः वऊनात्रकिमुक्ते
नत्रिषुलोकेषुमंत्रिणः अनेनमंत्रराजेननासाध्यंविद्यतेक्वचित् उर्द्धाम्नायेक
निस्नातः पराप्रासादमंत्रवित् कुलार्णवार्थतत्वज्ञोजीवन्मुक्तःकुलेश्वरि सुती
र्थेवाप्यतीर्थेवाजनमध्येपिवावसन् पराप्रासादमंत्रज्ञोमुक्तएवनसंशयः
आगमोक्तेनविधिनाक्रमपूजापरःसरं श्रीप्रासादपराबीजमष्टोत्तरशतंजपे
त् मुच्यतेब्रह्महत्यादिमहापापैश्चपंचभिः द्विशतंयोजपेद्देविश्रीप्रासादपरा
मनुं चतुरासीतिलक्षांगधारणाचरितैरपि अयोतिजांगचरितैरसंख्याःज

उ० मा० ननार्जितैः वाईकेयोवनेवाल्पेजायत्स्वमसुषमिष कर्मणामनसावाचज्ञानाज्ञा
३४ नकृतैरपि महापातकसंघैश्चाप्युपपातकराशिभिः मुच्यतेनात्रसंदेहः सत्यमे
तद्वरानने त्रिशतंयोजपेद्देवि श्रीप्रासादपरामनुं सर्वक्रतुषुयत्पुण्यंसर्वदा
नेषुयत्फलं सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं तत्फलंलभतेदेविनात्रका
34 र्याविचारणा चतुःशतंजपेद्यस्तुश्रीप्रासादपरामनुं सदातस्यगृहद्वारमणि
माद्यष्टसिद्धयः सेवंतेनात्रसंदेहः सर्वसिद्धिसमन्वितः यद्यन्मनोभिलषितंत
त्तत्प्राप्नोतिनसंशयं धर्मार्थकाममोक्षाश्चसाक्षात्तस्यकरेस्थितः सालोक्य
प्रमुखांदेविलभतेमुक्तिचतुर्विधां जपेत्पंचशतंयस्तुश्रीप्रासादपरामनुं त एम०
त्फलंनैवसक्नोमिकथितंकुलनायिके तस्मात्सर्वप्रयत्नेनसर्वावस्थासुसर्व ३४

उ॰ न्मा॰ दा श्रीप्रासादपरामंत्रं प्रजपेद्भुक्तिमुक्तये॥ ॥

३५

35

अध्यात्मपुराण

प १२५

प्रो
६५० उद्धामना ५